DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 3rd Semester Examination, 2023-24

## SANHGEC03T/SANGCOR03T-SANSKRIT (GE3/DSC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु ***पञ्चप्रश्नाः*** संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) 'स्वप्नवासवदत्तम्' इति नाटकस्य रचयिता कः ? नाटके कति अङ्काः सन्ति ?

(ख) उदयनस्य वीणायाः नाम किम् ? कस्मात् स तां प्राप्तवान् ?

(ग) को यौगन्धरायणः ? नाटके कस्मिन् कस्मिन् अङ्के सः दृश्यते ?

(घ) पद्मावती का ? कथं सा तपोवनमगच्छत् ?

(ङ) महासेनः क आसीत् ? कथं सः महसेन इति कथितः ?

(च) का च वसुन्धरा ? का नाम अङ्गारवती ?

(छ) 'दुःखं न्यासस्य रक्षणम्' – कस्मिन् अङ्के कस्य वचनमिदम् ?

### SECTION-B

2. अधोलिखितेषु यथाभिमतं ***प्रश्नद्वयस्य*** उत्तरं लेख्यम्। 10×2 = 20

(क) 'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्' – इत्युक्तिः अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणं विशद्यताम्।

(ख) शकुन्तलायाः पतिगृहयात्राया वर्णनं विधीयताम्।

(ग) दुष्यन्तस्य चरित्रवैशिष्ट्यं पर्यालोच्यताम्।

(घ) अभिज्ञानशकुन्तलमिति नाटकस्य पञ्चमाङ्के हंसपदिकायाः सङ्गीतस्य नाटकीयतात्पर्यं विचार्यताम्।

3. अधोलिखितेषु ***चत्वारः*** प्रश्नाः समाधेयाः। तेषु ***एकः*** संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 5×4 = 20

(क) शान्तमिदमाश्रमपदं स्फुरति च वाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥ — इति व्याख्येयम्।

(ख) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥ — इति व्याख्येयम्।

(ग) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥ — इति व्याख्येयम्।

(घ) टीका लेख्या — कुलपतिः

(ङ) टीका लेख्या — सूत्रधारः

(च) टीका लेख्या — सर्वदमनः

(छ) टीका लेख्या — गौतमी।

——×——